# Shri Shiva Sahasranamastotram from SkandamahapurAna

# શ્રીશિવસહસ્રનામસ્તોત્રમ્ સ્કન્દમહાપુરાણાન્તર્ગતમ્

## Document Information

Text title : shivasahasranAmastotra from Skandamahapurana

File name : shivasahasranAmastotraskanda.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : DPD, Sivakumar

Proofread by : DPD, Sivakumar

Description/comments : skandamahApurANe shaNkarasaMhitAyAM shivarahasyakhaNDe upadeshakANDe

Latest update : December 30, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2022

*sanskritdocuments.org*

Shri Shiva Sahasranamastotram from SkandamahapurAna

# શ્રીશિવસહસ્રનામસ્તોત્રમ્ સ્કન્દમહાપુરાણાન્તર્ગતમ્

(શ્રીસ્કન્દમહાપુરાણે શઙ્કરસંહિતાયાં શિવરહસ્યખણ્ડે ઉપદેશકાણ્ડે)
ૐ હરશ્શમ્ભુર્મહાદેવો નીલકણ્ઠસ્સદાશિવઃ ।
ભર્તા વરઃ પાણ્ડરાઙ્ગ આનન્દશ્શાન્તવિગ્રહઃ ॥ ૧॥

એકોઽનન્તો મૃગધરઃ શૂલપાણિર્ભવઃ શિવઃ ।
વહ્નિમધ્યનટો મુક્તઃ સ્વયમ્ભૂર્નિશિનર્તનઃ ॥ ૨॥

નન્દી પરશુપાણિશ્ચ જ્યોતિર્ભસ્માઙ્ગરાગભૃત્ ।
ગજોત્પાદી કપાલી ચ નિત્યશ્શુદ્ધોઽગ્નિધારકઃ ॥ ૩॥

શઙ્કરો ભૂરથો મેરુચાપો વૃષભવાહનઃ ।
ઉત્પત્તિશૂન્યો ભૂતેશો નાગાભરણધારણઃ ॥ ૪॥

ઉમાર્ધદેહી હિમવજ્જામાતા ભર્ગ ઉત્તમઃ ।
ઉમાપતિર્વહ્નિપાણિશ્છેત્તા પ્રલયનિર્ભયઃ ॥ ૫॥

એકરુદ્રઃ પાર્થબાણપ્રદો રુદ્રોઽતિવીર્યવાન્ ।
રવિચક્રરથસ્તદ્વત્સોમચક્રરથઃસ્મૃતઃ ॥ ૬॥

દિગમ્બરસ્સર્વનેતા વિષ્ણુમત્સ્યનિબર્હકઃ ।
મત્સ્યનેત્રાપહારીચ મત્સ્યનેત્ર વિભૂષણઃ ॥ ૭॥

મત્સ્યપૂજિતપાદશ્ચ તથૈવ કમલાસનઃ ।
વેદવેદ્યઃ સ્મૃતસ્તદ્વદ્વેદાશ્વરથ ઈરિતઃ ॥ ૮॥

વેદશ્ચ વેદકૌપીનો વેદનુપૂરકસ્તથા ।
વેદવાક્યો વેદમૂર્તિર્વેદાન્તો વેદપૂજિતઃ ॥ ૯॥

સર્વેશ્વરો નાદવાચ્યો બ્રહ્મમૂર્ધનિકૃન્તનઃ ।
તાણ્ડવશ્ચામૃતસ્તદ્વદૂર્ધ્વતાણ્ડવપણ્ડિતઃ ॥ ૧૦॥

આનન્દશ્ચણ્ડ આનન્દતાણ્ડવઃ પૂષદન્તભિત્ ।

ભગનેત્રહરસ્તદ્વદ્ગજચર્મામ્બરપ્રિયઃ ॥ ૧૧॥

કામાન્તકો વ્યાઘ્રભેદી મૃગી ચૈકાઙ્ગકસ્તથા ।
નિર્વિકારઃ પશુપતિસ્સર્વાત્મગોચરસ્તથા ॥ ૧૨॥

અગ્નિનેત્રો ભાનુનેત્રશ્ચન્દ્રનેત્રોઽપિ કથ્યતે ।
કૂર્મનિગ્રાહકઃ કૂર્મકપાલાહારકસ્તથા ॥ ૧૩॥

કૂર્મપૂજ્યસ્તથા કૂર્મકપાલાભરણસ્તથા ।
વ્યાઘ્રચર્મામ્બરઃ સ્વામી તથા પાશવિમોચકઃ ॥ ૧૪॥

ઓઙ્કારાભેનદ્ દ્વન્દ્વભઞ્જકજ્ઞાનમૂર્તયઃ ।
વિષ્ણુબાણો ગણપતિઃ પૂતોઽયન્તુ પુરાતનઃ ॥ ૧૫॥

ભૂતનુશ્ચ કૃપામૂર્તિઃ વિષ્ણૂત્પાદકપાદવાન્ ।
સુબ્રહ્મણ્યપિતા બ્રહ્મપિતા સ્થાણુરથ સ્મૃતઃ ॥ ૧૬॥

અર્ભકક્ષીરજલધિપ્રદો પોત્રિવિભેદકઃ ।
પોત્રિદન્તાપહારી ચ પોત્રિદન્તવિભૂષણઃ ॥ ૧૭॥

પોત્રિપૂજિતપાદશ્ચ ચન્દ્રપુષ્પેષુકસ્તથા ।
સર્વોપાદાનકસ્તદ્વદાર્દ્રભોઽગ્નિસમાકૃતિઃ ॥ ૧૮॥

માતાપિતૃવિહીનશ્ચ ધર્માધર્માવુભાવપિ ।
નિયુક્તરથસારથ્યબ્રહ્મપૂજિતપાદવાન્ ॥ ૧૯॥

રક્તપિઙ્ગજટો વિષ્ણુરભયો ભાનુદીપવાન્ ।
ભૂતસેનો મહાયોગી યોગી કાલિયનર્તનઃ ॥ ૨૦॥

ગીતપ્રિયો નારસિંહનિગ્રહીતાઽપિ કથ્યતે ।
નારસિંહશિરોભૂષો નારસિંહત્વગમ્બરઃ ॥ ૨૧॥

નારસિંહત્વગુત્પાટી નારાસિંહસુપૂજિતઃ ।
અણુરૂપી મહારૂપી અતિસુન્દરવિગ્રહઃ ॥ ૨૨॥

આચાર્યશ્ચ પુણ્યગિરિરાચાર્યોઽપિ ચ કથ્યતે ।
ભિક્ષામર્દનગોલાનાં ગિરિષ્વાચાર્ય ઈરિતઃ ॥ ૨૩॥

તથૈષાષ્ટમહાસિદ્ધિરન્તકાન્તક ઈરિતઃ ।
ઘોરસ્તથૈવ ગિરિશઃ કૃતમાલવિભૂષણઃ ॥ ૨૪॥

વૃષધ્વજો ડમરુકધરો વિષ્ણ્વક્ષિધારકઃ ।
રક્તાઙ્ગશ્ચ બ્રહ્મસૃષ્ટિપ્રદશ્ચાભયરૂપવાન્ ॥ ૨૫॥

વિષ્ણુરક્ષાપ્રદસ્તદ્વદષ્ટૈશ્વર્યસમન્વિતઃ ।
તથૈવાષ્ટગુણેશો વૈ ચાષ્ટમઙ્ગલકેશ્વરઃ ॥ ૨૬॥

બકાસુરસ્ય હર્તા ચ બકપક્ષધરોઽપિ સઃ ।
તથા મન્મથનાથોઽપિ વાસુદેવસુતપ્રદઃ ॥ ૨૭॥

મહાવતોઽધ્વનિત્યશ્ચ ત્યક્તકેતક ઈરિતઃ ।
મહાવ્રતો બિલ્વમાલાધારી પાશુપતઃ સ્મૃતઃ ॥ ૨૮॥

ત્રિધાભાશ્ચ પરઞ્જ્યોતિર્દ્વિસહસ્રદ્વિજો ભવાન્ ।
ત્રિવિક્રમનિહન્તા ચ ત્રિવિક્રમસુપૂજિતઃ ॥ ૨૯॥

ત્રિવિક્રમત્વગુત્પાટી તથા તચ્ચર્મકઞ્ચુકઃ ।
ત્રિવિક્રમાસ્થિદણ્ડી ચ સર્વો મધ્યસ્થકોઽપિ સઃ ॥ ૩૦॥

વટમૂલો વેણિજટસ્તથા વિષ્ણ્વસ્થિભૂષણઃ ।
વિકૃતો વિજયશ્ચૈવ તથા ભક્તકૃપાકરઃ ॥ ૩૧॥

સ્તોત્રપૂજાપ્રિયો રામવરદો હૃદયામ્બુજઃ ।
તથા પરશુરામૈનોહારકસ્તેન પૂજિતઃ ॥ ૩૨॥

રુદ્રાક્ષમાલી ભોગી ચ મહાભોગી ચ સંસ્મૃતઃ ।
ભોગાતીતશ્ચ સર્વેશો યોગાતીતો હરિપ્રિયઃ ॥ ૩૩॥

વેદવેદાન્તકર્તા ચ ત્ર્યમ્બકમનોહરૌ ।
વિનાયકો વિતરણો વિચિત્રો વ્રત ઇત્યપિ ॥ ૩૪॥

પરમેશો વિરૂપાક્ષો દેવદેવસ્ત્રિલોચનઃ ।
વૈણિકો વિષ્ટરસ્થોઽયં તથા ક્ષીરસમાકૃતિઃ ॥ ૩૫॥

આરણઃ કાઠકશ્ચૈવ સુમુખોઽમૃતવાગપિ ।
ધુસ્તૂરપુષ્પધારી ચ ઋગ્યજુર્વેદિનાવુભૌ ॥ ૩૬॥

સામવેદી તથાઽથર્વવેદી કામિકકારણૌ ।
વિમલો મકુટશ્ચૈવ વાતુલોઽચિન્ત્યયોગજૌ ॥ ૩૭॥

દીપ્તસ્સૂક્ષ્મસ્તથૈવાયં વીરશ્ચ કિરણોઽપિ ચ ।
અજિતશ્ચ સહસ્રશ્ચ અંશુમાન્ સુપ્રભેદકઃ ॥ ૩૮॥

તથા વિજયનિશ્વાસૌ નામ્ના સ્વાયમ્ભુવોઽપ્યયમ્ ।
અનલો રૌરવશ્ચન્દ્રજ્ઞાનો બિમ્બ ઉદીરિતઃ ॥ ૩૯॥

પ્રોદ્ગીતો લલિતસ્સિદ્ધસ્તથા સન્તાનનામવાન્।
શર્વોત્તરસ્તથાચાર્યપારમેશ્વર ઈરિતઃ ॥ ૪૦॥

ઉપાગમસમાખ્યોઽપિ તથા શિવપુરાણકઃ ।
ભવિષ્યચ્ચ તથૈવાયં માર્કણ્ડેયોઽપિ લૈઙ્ગકઃ ॥ ૪૧॥

સ્કાન્દો વરાહોઽપિ તથા વામનો મત્સ્યકૂર્મકૌ ।
બ્રહ્માણ્ડો બ્રાહ્મપાદ્મૌ ચ ગારુડો વિષ્ણુનારદૌ ॥ ૪૨॥

તથા ભાગવતાગ્નેયૌ બ્રહ્મકૈવર્તકોઽપ્યયમ્ ।
તથૈવોપપુરાણોઽપિ રામસ્યાસ્ત્રપ્રદોઽપિ સઃ ॥ ૪૩॥

રામસ્ય ચાપહારી ચ રામપૂજિતપાદવાન્।
માયી ચ શુદ્ધમાયી ચ વૈખરી મધ્યમા પરા ॥ ૪૪॥

પશ્યન્તી ચ તથા સૂક્ષ્મા તથા પ્રણવચાપવાન્ ।
જ્ઞાનાસ્ત્રસ્સકલશ્ચૈવ નિષ્કલસ્સકલશ્ચ વૈ ॥ ૪૫॥

વિષ્ણોઃ પતિરયં તદ્વદ્બલભદ્રબલપ્રદઃ ।
બલચાપાપહર્ત્તા ચ બલપૂજિતપાદવાન્ ॥ ૪૬॥

દણ્ડાયુધો વાઙ્ગનસોરગોચરસુગન્ધિનૌ ।
શ્રીકણ્ઠોઽપ્યયમાચારઃ ખટ્વાઙ્ગઃ પાશભૃત્તથા ॥ ૪૭॥

સ્વર્ણરૂપી સ્વર્ણવીર્યસ્સકલાત્માઽધિપઃ સ્મૃતઃ ।
પ્રલયઃ કાલનાથોઽપિ વિજ્ઞાનં કાલનાયકઃ ॥ ૪૮॥

પિનાકપાણિસ્સુકૃતો વિષ્કારો વિસ્તુરક્તપઃ ।
વિષ્ણોઃ ક્ષારકરસ્તદ્વત્કૃષ્ણજ્ઞાનપ્રદો હિ સઃ ॥ ૪૯॥

કૃષ્ણાય પુત્રદઃ કૃષ્ણયુદ્ધદઃ કૃષ્ણપાપહા ।
કૃષ્ણપૂજિતપાદશ્ચ કર્કિવિષ્ણ્વશ્વભઞ્જનઃ ॥ ૫૦॥

કર્કિપૂજિતપાદશ્ચ વહ્નિજિહ્વાતિકૃન્તનઃ ।
ભારતીનાસિકાચ્છેત્તા પાપનાશો જિતેન્દ્રિયઃ ॥ ૫૧॥

શિષ્ટો વિશિષ્ટઃ કર્તા ચ ભીમેભ્યો ભીમ ઉચ્યતે ।

શિવતત્ત્વં તથા વિદ્યાતત્ત્વં પઞ્ચાક્ષરોઽપિ સઃ ॥ ૫૨॥

પઞ્ચવક્ત્રઃ સ્મિતશિરોધારી બ્રહ્માસ્થિભૂષણઃ ।
આત્મતત્ત્વં તથા દૃશ્યસહાયો રસવીર્યવાન્ ॥ ૫૩॥

અદૃશ્યદ્રષ્ટા મેનાયા જામાતોગ્રષ્ષડઙ્ગવાન્ ।
તથા દક્ષશિરશ્છેત્તા તત્પુરુષો બ્રાહ્મણશિખી ॥ ૫૪॥

અષ્ટમૂર્તિશ્ચાષ્ટભુજષ્ષડક્ષરસમાહ્વયઃ ।
પઞ્ચકૃત્યઃ પઞ્ચધેનુઃ પઞ્ચવૃક્ષોઽગ્નિકશ્ચિવાન્ ॥ ૫૫॥

શઙ્ખવર્ણસ્સર્પકટિસ્સૂત્રોઽહઙ્કાર ઈરિતઃ ।
સ્વાહાકારઃ સ્વધાકારઃ ફટ્કારસ્સુમુખઃ સ્મૃતઃ ॥ ૫૬॥

દીનાન્ધકકૃપાલુશ્ચ વામદેવોઽપિ કન્થ્યતે ।
ધીરઃ કલ્પો યુગો વર્ષમાસાવૃતુસમાહ્વયઃ ॥ ૫૭॥

રાશિવાસરનક્ષત્રયોગાઃ કરણ ઈરિતઃ ।
ઘટી કાષ્ઠા વિનાડી ચ પ્રાણો ગુરુનિમેષકૌ ॥ ૫૮॥

શ્રવણર્ક્ષો મેઘવાહો બ્રહ્માણ્ડસૃગુદીરિતઃ ।
જાગ્રત્સ્વપ્નસુષુપ્તિશ્ચ તુર્યોઽયમતિતુર્યવાન્ ॥ ૫૯॥

તથૈવ કેવલાવસ્થસ્સકલાવસ્થ ઇત્યપિ।
શુદ્ધાવસ્થોત્તમાઙ્ગૌ ચ સૃષ્ટિરક્ષાવિધાયિનૌ ॥ ૬૦॥

સંહર્તા ચ તિરોભૂત અનુગ્રહકરસ્તથા ।
સ્વતન્ત્રઃ પરતન્ત્રશ્ચ ષણ્મુખઃ કાલ ઈરિતઃ ॥ ૬૧॥

અકાલશ્ચ તથા પાશુપતાસ્ત્રકર ઈશ્વરઃ ।
અઘોરક્ષુરિકાસ્ત્રૌ ચ પ્રત્યઙ્ગાસ્ત્રોઽપિ કથ્યતે ॥ ૬૨॥

પાદોત્સૃષ્ટમહાચક્રો વિષ્ણુવેશ્યાભુજઙ્ગકઃ ।
નાગયજ્ઞોપવીતી ચ પઞ્ચવર્ણોઽપિ મોક્ષદઃ ॥ ૬૩॥

વાય્વગ્નીશૌ સર્પકચ્છઃ પઞ્ચમૂર્તશ્ચ ભોગદઃ ।
તથા વિષ્ણુશિરશ્છેત્તા શેષજ્યો બિન્દુનાદકઃ ॥ ૬૪॥

સર્વજ્ઞો વિષ્ણુનિગલમોક્ષકો બીજવર્ણકઃ ।
બિલ્વપત્રધરો બિન્દુનાદપીઠસ્તુ શક્તિદઃ ॥ ૬૫॥

તથા રાવણનિષ્પેષ્ટા ભૈરવોત્પાદકોઽપ્યયમ્।
દક્ષયજ્ઞવિનાશી ચ ત્રિપુરત્રયશિક્ષકઃ ॥ ૬૬॥

સિન્દૂરપત્રધારી ચ મન્દારસ્રગલઙ્કૃતઃ ।
નિર્વીર્યો ભાવનાતીતસ્તથા ભૂતગણેશ્વરઃ ॥ ૬૭॥

બિષ્ણુભ્રૂમધ્યપાદી ચ સર્વોપાદાનકારણમ્ ।
નિમિત્તકારણં સર્વસહકાર્યપિ કથ્યતે ॥ ૬૮॥

તત્સદ્વ્યાસકરચ્છેત્તા શૂલપ્રોતહરિસ્તથા ।
ભેદાભેદૌ વેદવલ્લીકણ્ઠચ્છેત્તા હિ કથ્યતે ॥ ૬૯॥

પઞ્ચબ્રહ્મસ્વરૂપી ચ ભેદાભેદોભયાત્મવાન્ ।
અચ્છસ્ફટિક સઙ્કાશો બ્રહ્મભસ્માવલેપનઃ ॥ ૭૦॥

નિર્દગ્ધવિષ્ણુભસ્માઙ્ગરાગઃ પિઙ્ગજટાધરઃ ।
ચણ્ડાર્પિતપ્રસાદશ્ચ ધાતા ધાતૃવિવર્જિતઃ ॥ ૭૧॥

કલ્પાતીતઃ કલ્પભસ્મ ચાગસ્ત્યકુસુમપ્રિયઃ ।
અનુકલ્પોપકલ્પૌ ચ સઙ્કલ્પશ્છેદદુન્દુભિઃ ॥ ૭૨॥

વિકલ્પો વિષ્ણુદુર્જ્ઞેયપાદો મૃત્યુઞ્જયઃ સ્મૃતઃ ।
વિષ્ણુશ્મશાનનટનો વિષ્ણુકેશોપવીતવાન્ ॥ ૭૩॥

બ્રહ્મશ્મશાનનટનઃ પઞ્ચરાવણઘાતકઃ ।
સર્પાધીશાન્તરસ્તદ્વદનલાસુરઘાતકઃ ॥ ૭૪॥

મહિષાસુરસંહર્તા નાલીદૂર્વાવતંસકઃ ।
દેવર્ષિનરદૈત્યેશો રાક્ષસેશો ધનેશ્વરઃ ॥ ૭૫॥

ચરાચરેશોઽનુપદો મૂર્તિચ્છન્દસ્વરૂપિણૌ ।
એકદ્વિત્રિચતુઃ પઞ્ચજાનિનો વિક્રમાશ્રમઃ ॥ ૭૬॥

બ્રહ્મવિષ્ણુકપાલાગ્રજયકિઙ્કિણિકાઙ્ઘ્રિકઃ ।
સંહારકાટ્ટહાસોઽપિ સર્વસંહારકઃ સ્મૃતઃ ॥ ૭૭॥

સર્વસંહારનેત્રાગ્નિઃ સૃષ્ટિકૃદ્વાઙ્મનોયુતઃ ।
સંહારકૃત્ ત્રિશૂલોઽપિ રક્ષાકૃત્પાણિપાદવાન્ ॥ ૭૮॥

ભૃઙ્ગિનાટ્યપ્રિયશ્શઙ્ખપદ્મનિધ્યોરધીશ્વરઃ ।
સર્વાન્તરો ભક્તચિન્તિતાર્થદો ભક્તવત્સલઃ ॥ ૭૯॥

ભક્તાપરાધસોઢા ચ વિકીર્ણજટ ઈરિતઃ ।
જટામકુટધારીચ વિશદાસ્ત્રોઽપિ કથ્યતે ॥ ૮૦ ॥

અપસ્મારીકૃતાવિદ્યાપૃષ્ઠાઙ્ઘ્રિઃ સ્થૌલ્યવર્જિતઃ ।
યુવા નિત્યયુવા વૃદ્ધો નિત્યવૃદ્ધોઽપિ કથ્યતે ॥ ૮૧ ॥

શક્ત્યુત્પાટી શક્તિયુક્તસ્સત્યાત્સત્યોઽપિ કથ્યતે ।
વિષ્ણૂત્પાદક અદ્વન્દ્વઃ સત્યાસત્યશ્ચ ઈરિતઃ ॥ ૮૨ ॥

મૂલાધારસ્તથા સ્વાધિષ્ઠાનશ્ચ મણિપૂરકઃ ।
અનાહતો વિશુદ્ધ્યાજ્ઞે તથા બ્રહ્મબિલં સ્મૃતઃ ॥ ૮૩ ॥

વરાભયકરશ્શાસ્તૃપિતા તારકમારકઃ ।
સાલોક્યદશ્ચ સામીપ્યદાયી સારૂપ્યદઃ સ્મૃતઃ ॥ ૮૪ ॥

સાયુજ્યમુક્તિદસ્તદ્વદ્ધરિકન્ધરપાદુકઃ ।
નિકૃત્તબ્રહ્મમૂર્ધા ચ શાકિનીડાકિનીશ્વરઃ ॥ ૮૫ ॥

યોગિનીમોહિનીનાથો દુર્ગાનાથોઽપિ કથ્યતે ।
યજ્ઞો યજ્ઞેશ્વરો યજ્ઞહવિર્ભુગ્યજ્વનાં પ્રિયઃ ॥ ૮૬ ॥

વિષ્ણુશાપાપહર્તા ચ ચન્દ્રશાપાપહારકઃ ।
ઇન્દ્રશાપાપહર્તાચ વેદાગમપુરાણકૃત્ ॥ ૮૭ ॥

વિષ્ણુબ્રહ્મોપદેષ્ટા ચ સ્કન્દોમાદેશિકોઽપ્યયમ્ ।
વિઘ્નેશસ્યોપદેષ્ટા ચ નન્દિકેશગુરુસ્તથા ॥ ૮૮ ॥

તથા ઋષિગુરુસ્સર્વગુરુર્દશદિગીશ્વરઃ ।
દશાયુધદશાઙ્ગૌ ચ જ્ઞાનયજ્ઞોપવીતવાન્ ॥ ૮૯ ॥

બ્રહ્મવિષ્ણુશિરોમુણ્ડકન્દુકઃ પરમેશ્વરઃ ।
જ્ઞાનક્રિયાયોગચર્યાનિરતોરગકુણ્ડલૌ ॥ ૯૦ ॥

બ્રહ્મતાલપ્રિયો વિષ્ણુપટહપ્રીતિરપ્યયમ્ ।
ભણ્ડાસુરાપહર્તાચ કઙ્કપત્રધરોઽપ્યયમ્ ॥ ૯૧ ॥

તન્ત્રવાદ્યરતસ્તદ્વદર્કપુષ્પપ્રિયોઽપ્યયમ્ ।
વિષ્ણ્વાસ્યમુક્તવીર્યોઽપિ દેવ્યગ્ગ્રકૃતતાણ્ડવઃ ॥ ૯૨ ॥

જ્ઞાનામ્બરો જ્ઞાનભૂષો વિષ્ણુશઙ્ખપ્રિયોઽપ્યયમ્ ।

વિષ્ણૂદરવિમુક્તાત્મવીર્યશ્ચૈવ પરાત્પરઃ ॥ ૯૩॥

મહેશ્વરશ્ચેશ્વરોઽપિ લિઙ્ગોદ્ભવસુખાસનૌ ।
ઉમાસખશ્ચન્દ્રચૂડશ્ચાર્ધનારીશ્વરઃ સ્મૃતઃ ॥ ૯૪॥

સોમાસ્કન્દસ્તથા ચક્રપ્રસાદી ચ ત્રિમૂર્તિકઃ ।
અર્ધાઙ્ગવિષ્ણુશ્ચ તથા દક્ષિણામૂર્તિરવ્યયઃ ॥ ૯૫॥

ભિક્ષાટનશ્ચ કઙ્કાલઃ કામારિઃ કાલશાસનઃ ।
જલન્ધરારિસ્ત્રિપુરહન્તા ચ વિષભક્ષણઃ ॥ ૯૬॥

કલ્યાણસુન્દરશરભમૂર્તી ચ ત્રિપાદપિ ।
એકપાદો ભૈરવશ્ચ વૃષારૂઢસ્સદાનટઃ ॥ ૯૭॥

ગઙ્ગાધરષ્ષણ્ણવતિતત્ત્વમપ્યયમીરિતઃ ।
તથા સાષ્ટશતભેદમૂરતિરષ્ટશતાહ્વયઃ ॥ ૯૮॥

અષ્ટોત્તરશતં તાલરાગનૃત્તૈકપણ્ડિતઃ ।
સહસ્રાખ્યસ્સહસ્રાક્ષસ્સહસ્રમુખ ઈરિતઃ ॥ ૯૯॥

સહસ્રબાહુ સ્તન્મૂર્તિરનન્તમુખ ઈરિતઃ ।
અનન્તનામાપિ તથા ચાનન્તશ્રુતિરપ્યયમ્ ॥ ૧૦૦॥

અનન્તનયનસ્તદ્વદનન્તઘ્રાણમણ્ડિતઃ ।
અનન્તરૂપ્યયં તદ્વદનન્તૈશ્વર્યવાન્ સ્મૃતઃ ॥ ૧૦૧॥

અનન્તશક્તિકૃત્યાવાનનન્તજ્ઞાનવાનયમ્ ।
અનન્તાનન્દસન્દોહ અનન્તૌદાર્યવાનયમ્ ॥ ૧૦૨॥

તથૈવ પૃથિવીમૂર્તિઃ પૃથિવીશોઽપિ કથ્યતે ।
પૃથિવીધારકસ્તદ્વત્પૃથિવ્યાન્તર ઈરિતઃ ॥ ૧૦૩॥

પૃથિવ્યતીતશ્ચ તથા પાર્થિવાણ્ડાભિમાન્યયમ્ ।
તદણ્ડપુરુષહૃદયકમલોઽપિ નિગદ્યતે ॥ ૧૦૪॥

તદણ્ડભુવનેશાનઃ તચ્છક્તિધરણાત્મકઃ ।
આધારશક્ત્યધિષ્ઠાનાનન્તાઃ કાલાગ્નિરપ્યયમ્ ॥ ૧૦૫॥

કાલાગ્નિરુદ્રભુવનપતિરપ્યયમીરિતઃ ।
અનન્તશ્ચ તથેશશ્ચ શઙ્કરઃ પદ્મપિઙ્ગલૌ ॥ ૧૦૬॥

કાલશ્ચ જલજશ્ચૈવ ક્રોધોઽતિબલ ઈરિતઃ ।
ધનદશ્ચાતિકૂશ્માણ્ડભુવનેશોઽપિ કથ્યતે ॥ ૧૦૭॥

કૂશ્માણ્ડસ્સપ્તપાતાલનાયકોઽપિ નિગદ્યતે ।
પાતાલાન્તોઽપિ ચેશાનો બલાતિબલનાવુભૌ ॥ ૧૦૮॥

બલવિકરણશ્ચાયં બલેશોઽપિ બલેશ્વરઃ ।
બલાધ્યક્ષશ્ચ બલવાન્હાટકેશોઽપિ કથ્યતે ॥ ૧૦૯॥

તથા તદ્ભુવનેશાનસ્તથૈવાષ્ટગજેશ્વરઃ ।
અષ્ટનાગેશ્વરસ્તદ્વદ્ભૂલોકેશોઽપિ કથ્યતે ॥ ૧૧૦॥

મેર્વીશો મેરુશિખરરાજોઽવનિપતિસ્તથા ।
ત્ર્યમ્બકશ્ચાષ્ટકુલપર્વતેશોઽપિ કથ્યતે ॥ ૧૧૧॥

માનસોત્તરગિરિ સ્તદ્વદ્વિશ્વેશોઽપિ નિગદ્યતે ।
સ્વર્ણલોકશ્ચક્રવાલગિરિવાસવિરામકઃ ॥ ૧૧૨॥

ધર્મો વિવિધધામા ચ શઙ્ખપાલશ્ચ કથ્યતે ।
તથા કનકરોમા ચ પર્જન્યઃ કેતુમાનપિ ॥ ૧૧૩॥

વિરોચનો હરિચ્છાયો રક્તચ્છાયશ્ચ કથ્યતે ।
મહાન્ધકારનાથોઽપિ અણ્ડભિત્તીશ્વરોઽપ્યયમ્ ॥ ૧૧૪॥

પ્રાચીવજ્રીશ્વરો દક્ષિણપ્રાચીશોઽપિ ગદ્યતે ।
અગ્નીશ્વરો દક્ષિણશ્ચ દિગીશો ધર્મરાડપિ ॥ ૧૧૫॥

દક્ષિણાશાપતિસ્તદ્વન્નિરૃતીશોઽપિ કથ્યતે ।
પશ્ચિમાશાપતિસ્તદ્વદ્વરુણેશોઽપિ કથ્યતે ॥ ૧૧૬॥

તથોદક્પશ્ચિમેશોઽપિ વાય્વીશોઽપિ તથોચ્યતે ।
તથૈવોત્તરદિઙ્નાથઃ કુબેરેશોઽપિ ચોચ્યતે ॥ ૧૧૭॥

તથૈવોત્તરપૂર્વેશ ઈશાનેશોઽપિ કથ્યતે ।
કૈલાસશિખરીનાથઃ શ્રીકણ્ઠપરમેશ્વરઃ ॥ ૧૧૮॥

મહાકૈલાસનાથોઽપિ મહાસદાશિવઃ સ્મૃતઃ ।
ભુવર્લોકેશશમ્ભૂગ્રાસ્સૂર્યમણ્ડલનાયકઃ ॥ ૧૧૯॥

પ્રકાશરુદ્રો યશ્ચન્દ્રમણ્ડલેશોઽપિ કથ્યતે ।
તથા ચન્દ્રમહાદેવો નક્ષત્રાણામધીશ્વરઃ ॥ ૧૨૦॥

ગ્રહલોકેશ ગન્ધર્વગાન્ધર્વેશાવુભાવપિ ।
સિદ્ધવિદ્યાધરેશોઽયં કિન્નરેશોઽપિ કથ્યતે ॥ ૧૨૧॥

યક્ષચારણનાથોઽપિ સ્વર્લોકેશોઽપિ સ સ્મૃતઃ ।
ભીમશ્ચૈવ મહર્લોકનાથશ્ચૈવ મહાભવઃ ॥ ૧૨૨॥

જનલોકેશ્વરો જ્ઞાનપાદો જનનવર્જિતઃ ।
અતિપિઙ્ગલ આશ્ચર્યો ભૌતિકશ્ચ શ઼ૃતોઽપ્યયમ્ ॥ ૧૨૩॥

તપોલોકેશ્વરસ્તસ્મો મહાદેવોઽપિ સ સ્મૃતઃ ।
સત્યલોકેશ્વરસ્તદ્વત્ બ્રહ્મેશાનોઽપિ ચોચ્યતે ॥ ૧૨૪॥

વિષ્ણુલોકેશવિષ્વવીશૌ શિવલોકઃ પરશ્શિવઃ ।
અણ્ડાન્તેશો દણ્ડપાણિરણ્ડપૃષ્ઠેશ્વરોઽપ્યયમ્ ॥ ૧૨૫॥

શ્વેતશ્ચ વાયુવેગોઽપિ સુપાત્રશ્ચ સ્મૃતોઽપ્યયમ્ ।
વિદ્યાહ્વયાત્મકસ્તદ્વત્કાલાગ્નિશ્ચ સ્મૃતોઽપ્યયમ્ ॥ ૧૨૬॥

મહાસંહારકસ્તદ્વન્મહાકાલોઽપિ કથ્યતે ।
મહાનિરૃતિરપ્યેવ મહાવરુણ ઇત્યપિ ॥ ૧૨૭॥

વીરભદ્રો મહાંસ્તદ્વચ્છતરુદ્રોઽપિ કથ્યતે ।
ભદ્રકાલવીરભદ્રૌ કમણ્ડલુધરોઽપ્યયમ્ ॥ ૧૨૮॥

અબ્ભુવનેશોઽપિ તથા લક્ષ્મીનાથોઽપિ કથ્યતે ।
સરસ્વતીશો દેવેશઃ પ્રભાવેશોઽપિ કથ્યતે ॥ ૧૨૯॥

તથૈવ ડિણ્ડીવલ્મીકનાથૌ પુષ્કરનાયકઃ ।
મણ્ડીશભારભૂતેશૌ બિલાલકમહેશ્વર ॥ ૧૩૦॥

તેજોમણ્ડલનાથોઽપિ તેજોમણ્ડલમૂર્તિપઃ ।
તેજોમણ્ડલવિશ્વેશશ્શિવોઽગ્નિરપિ કથ્યતે ॥ ૧૩૧॥

વાયુમણ્ડલમૂર્તિશ્ચ વાયુમણ્ડલધારકઃ ।
વાયુમણ્ડલનાથશ્ચ વાયુમણ્ડલરક્ષકઃ ॥ ૧૩૨॥

મહાવાયુસુવેગોઽયમાકાશમણ્ડલેશ્વરઃ ।
આકાશમણ્ડલધરસ્તન્મૂર્તિરપિ સંસ્મૃતઃ ॥ ૧૩૩॥

આકાશમણ્ડલાતીતસ્તન્મણ્ડલભુવનપઃ ।

મહારુદ્રશ્ચ તન્માત્રમણ્ડલેશશ્ચ સંસ્મૃતઃ ॥ ૧૩૪॥

તન્માત્રમણ્ડલપતિર્મહાશર્વમહાભવૌ ।
મહાપશુપીતશ્ચાપિ મહાભીમો મહાહરઃ ॥ ૧૩૫॥

કર્મેન્દ્રિયમણ્ડલેશસ્તન્મણ્ડલભુવઃ પતિઃ પતિઃ ।
ક્રિયાસરસ્વતીનાથઃ ક્રિયા ( શ્રિયા) લક્ષ્મીપતિસ્તથા ॥ ૧૩૬॥

ક્રિયેન્દ્રિયઃ ક્રિયામિત્રઃ ક્રિયાબ્રહ્મ પતિઃ પતિઃ ।
જ્ઞાનેન્દ્રિયમણ્ડલેશઃ તન્મણ્ડલભુવનપઃ ॥ ૧૩૭॥

ભૂમિદેવદિશ્શિવેશશ્ચ વરુણોઽપિ ચ વહ્નિપઃ ।
વાતેશો વિવિધાવિષ્ટમણ્ડલેશાબુભાવપિ ॥ ૧૩૮॥

વિષયમણ્ડલભુવનેશો ગન્ધર્વેશઃ શિવેશ્વરઃ ।
પ્રાસાદબલભદ્રશ્ચ સૂક્ષ્મેશો માનવેશ્વરઃ ॥ ૧૩૯॥

અન્તઃકરણમણ્ડલેશો બુદ્ધિચિત્તમનઃ પતિઃ ।
અહઙ્કારેશ્વરશ્ચાપિ ગુણમણ્ડલનાયકઃ ॥ ૧૪૦॥

સંવર્તસ્તામસગુણપતિસ્તદ્ભુવનાધિપઃ ।
એકવીરઃ કૃતાન્તશ્ચ સન્ન્યાસી સર્વશઙ્કરઃ ॥ ૧૪૧॥

પુરુષમૃગાનુગ્રહદસ્સસાક્ષીકો ગુણાધિપઃ ।
કાક્ષીકશ્ચ ભુવનેશઃ કૃતશ્ચ કૃતભૈરવઃ ॥ ૧૪૨॥

બ્રહ્માશ્રીકણ્ઠદેવોઽયં સરાજસગુણેશ્વરઃ ।
રાજસગુણભુવનેશો બલાધ્યક્ષશ્ચ કથ્યતે ॥ ૧૪૩॥

ગુણાધ્યક્ષો મહાશાન્તો મહાત્રિપુરઘાતકઃ ।
સર્વરૂપી નિમેષશ્ચ ઉન્મેષ ઇતિ કથ્યતે ॥ ૧૪૪॥

પ્રકૃતીમણ્ડલેશોઽયં તન્મણ્ડલભુવનપઃ ।
શુભરામશુભભીમશુદ્ધોગ્રશુદ્ધભવ શુદ્ધશર્વશુદ્ધૈકવીરાઃ ॥ ૧૪૫॥

પ્રચણ્ડપુરુષશુભગન્ધજનિરહિતહરીશનાગમણ્ડલેશાઃ ।
નાગમણ્ડલભુવનેશ અપ્રતિષ્ઠઃ પ્રતિષ્ઠકઃ ॥ ૧૪૬॥

રૂપાઙ્ગમનોન્મનમહાવીરસ્વરૂપકાઃ ।
કલ્યાણબહુવીરશ્ચ બલમેધાદિચેતનઃ ॥ ૧૪૭॥

દક્ષો નિયતિમણ્ડલેશો નિયતિમણ્ડલભુવનપઃ ।
વાસુદેવશ્ચ વજ્રી ચ વિધાતાઽભ્રમણિઃ સ્મૃતઃ ॥ ૧૪૮॥

કલવિકરણશ્ચૈવ બલવિકરણસ્તથા ।
બલપ્રમથનશ્ચૈવ સર્વભૂતદમશ્ચ સઃ ॥ ૧૪૯॥

વિદ્યામણ્ડલેશો વિદ્યામણ્ડલભુવનપઃ ।
મહાદેવો મહાજ્યોતિર્મહાદેવેશ ઇત્યપિ ॥ ૧૫૦॥

કલામણ્ડલેશશ્ચ કલામણ્ડલભુવનપઃ ।
વિશુદ્ધશ્ચ પ્રબુદ્ધશ્ચ શુદ્ધશ્ચૈવ સ્મૃતશ્ચ સઃ ॥ ૧૫૧॥

શુચિવર્ણપ્રકાશશ્ચ મહોક્ષોક્ષા ચ કીર્તિતઃ ।
માયાતન્વીશ્વરો માયાભુવનેશસ્સુશક્તિમાન્ ॥ ૧૫૨॥

વિદ્યોતનો વિશ્વબીજો જ્યોતીરુપશ્ચ ગોપતિઃ ।
ત્રિકાલબ્રહ્મકર્તા ચ અનન્તેશશ્ચ સંસ્મૃતઃ ॥ ૧૫૩॥

શુદ્ધવિદ્યેશઃ શુદ્ધશ્ચ વિદ્યાભુવનનાયકઃ ।
વામેશસર્વજ્યેષ્ઠેશૌ રૌદ્રીકાલેશ્વરાવુભૌ ॥ ૧૫૪॥

કલવિકરણીકશ્ચ બલવિકરણીશ્વરઃ ।
બલપ્રમથિનીશોઽપિ સર્વભૂતદમેશ્વરઃ ॥ ૧૫૫॥

મનોન્મનેશસ્તત્ત્વેશસ્તથૈવ ભુવનેશ્વરઃ ।
મહામહેશ્વરસ્સદાશિવતત્ત્વેશ્વરાવુભૌ ॥ ૧૫૬॥

સદાશિવભુવનેશો જ્ઞાનવૈરાગ્યનાયકઃ ।
ઐશ્વર્યેશશ્ચ ધર્મેશસ્સદાશિવ ઇતિ સ્મૃતઃ ॥ ૧૫૭॥

અણુસદાશિવોઽપ્યેષ અષ્ટવિદ્યેશ્વરોઽપ્યયમ્ ।
શક્તિતત્ત્વેશ્વરશ્શક્તિભુવનેશોઽપિ કથ્યતે ॥ ૧૫૮॥

બિન્દુમૂર્તિસ્સપ્તકોટિમહામન્ત્રેશ્વરોઽપ્યયમ્ ।
નિવૃત્તીશઃ પ્રતિષ્ઠેશો વિદ્યેશશ્શાન્તિનાયકઃ ॥ ૧૫૯॥

શાન્ત્યતીતેશ્વરસ્તદ્વદર્ધચન્દ્રેશ્વરોઽપ્યયમ્ ।
સુશાન્તીશશ્ચ તથા શિવાશ્રયસમાહ્વયઃ ॥ ૧૬૦॥

યોજનીયશ્ચ યોજ્યશ્ચ યોજનાતીતનાયકઃ ।
સુપ્રભેદનિરોધીશૌ ઇન્ધનીરેચકેશ્વરઃ ॥ ૧૬૧॥

રૌદ્રીશજ્ઞાનબોધેશૌ તમોપહ ઇતિ સ્મૃતઃ ।
નાદતત્ત્વેશ્વરસ્તદ્વન્નાદાખ્યભુવનેશ્વરઃ ॥ ૧૬૨॥

ઇન્ધિકેશો દીપિકેશો મોચિકેશશ્ચ સંસ્મૃતઃ ।
ઊર્ધ્વગામિનીશોઽપિ ઇડાનાથોઽપિ કથ્યતે ॥ ૧૬૩॥

સુષુમ્નેશઃ પિઙ્ગલેશો બ્રહ્મરન્ધ્રેશ્વરોઽપ્યયમ્ ।
બ્રહ્મરન્ધ્રસ્વરૂપીશઃ પઞ્ચબીજેશ્વરોઽપ્યયમ્ ॥ ૧૬૪॥

અમૃતેશશ્ચ શક્તીશસ્સૂક્ષ્મેશશ્ચ સુસૂક્ષ્મપઃ ।
મૃતેશશ્ચામૃતેશોઽપિ વ્યાપિનીશોઽપિ કથ્યતે ॥ ૧૬૫॥

પરનાદેશ્વરો વ્યોમ વ્યોમરૂપી ચ કથ્યતે ।
અનાશ્રિતોઽપ્યનન્તશ્ચ અનાદશ્ચ મુનીશ્વરઃ ॥ ૧૬૬॥

ઉન્મનીશો મન્ત્રમૂર્તિર્મન્ત્રેશો મન્ત્રધારકઃ ।
મન્ત્રાતીતઃ પદામૂર્તિઃ પદેશઃ પદધારકઃ ॥ ૧૬૭॥

પદાતીતોઽક્ષરાત્મા ચ અક્ષરેશોઽક્ષરાશ્રયઃ ।
કલાતીતશ્ચ તથા ઓઙ્કારાત્મા ચ કથ્યતે ॥ ૧૬૮॥

ઓઙ્કારેશશ્ચતથા ઓઙ્કારાસન ઈરિતઃ ।
પરાશક્તિપતિસ્તદ્વદાદિશક્તિપતિશ્ચ સઃ ॥ ૧૬૯॥

ઇચ્છાશક્તિપતિશ્ચૈવ જ્ઞાનશક્તિપતિશ્ચ સઃ ।
ક્રિયાશક્તિપતિસ્તદ્વત્ શિવસાદાખ્ય ઈરિતઃ ॥ ૧૭૦॥

અમૂર્તિસાદારવ્યશ્ચૈવ મૂર્તિસાદારવ્ય ઈરિતઃ ।
કર્તૃસાદાખ્યશ્ચ તથા કર્મસાદાખ્ય ઈરિતઃ ॥ ૧૭૧॥

સર્વસ્રષ્ટા સર્વરક્ષાકારકસ્સર્વહારકઃ ।
તિરોભાવકૃદપ્યેષ સર્વાનુગ્રાહકસ્તથા ॥ ૧૭૨॥

નિરઞ્જનોઽચઞ્ચલશ્ચ વિમલોઽનલ ઈરિતઃ ।
સચ્ચિદાનન્દરૂપી ચ વિષ્ણુચક્રપ્રસાદકૃત્ ॥ ૧૭૩॥

સર્વવ્યાપી તથાદ્વૈતવિશિષ્ટાદ્વૈતકાવુભૌ ।
પરિપૂર્ણો લિઙ્ગરૂપો મહાલિઙ્ગસ્વરૂપવાન્ ॥ ૧૭૪॥

શ્રીસૂતઃ -

એવમાખ્યાતમધુના યુષ્માકં બ્રાહ્મણોત્તમાઃ ।
અષ્ટોત્તરસહસ્રાણિ નામાનિ ગિરિજાપતેઃ ॥ ૧૭૫॥

યઃ પઠેચ્છમ્ભુનામાનિ પવિત્રાણિ મહામતિઃ ।
શ‍ૃણુયાદ્વાપિ ભક્ત્યા સ રુદ્ર એવ ન સંશયઃ ॥ ૧૭૬॥

સ ધન્યસ્સ કુલીનશ્ચ સ પૂજ્યસ્સ મહત્તરઃ ।
તસ્યૈવ ચ મહાલક્ષ્મીસ્તસ્યૈવ ચ સરસ્વતી ॥ ૧૭૭॥

સ શક્તાનપિ સઙ્ગ્રામે વિભીષયતિ રુદ્રવત્ ।
પુત્રાર્થી પુત્રમાપ્નોતિ ધનાર્થી ચ મહદ્ધનમ્ ॥ ૧૭૮॥

આરોગ્યકામસ્ત્વારોગ્યમવ્યાધિદૃઢગાત્રતામ્ ।
શિખાયાં ધારયેદ્યોઽસૌ લિખિત્વા પુસ્તકે સદા ॥ ૧૭૯॥

રાજદ્વારે ચ સદસિ સ વશીકુરુતે જનાન્ ।
ન ચ હિંસન્તિ સર્પાદ્યા રાક્ષસા ન પિશાચકાઃ ॥

કિં પુનર્બ્રાહ્મણશ્રેષ્ઠાસ્સર્વાન્કામાન્ લભેદયમ્ ॥ ૧૮૦॥

॥ ઇતિ શ્રીસ્કન્દમહાપુરાણે શઙ્કરસંહિતાયાં શિવરહસ્યખણ્ડે
ઉપદેશકાણ્ડે શ્રીશિવસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by DPD, Sivakumar

*Shri Shiva Sahasranamastotram from SkandamahapurAna*

pdf was typeset on August 14, 2022

Please send corrections to *sanskrit@cheerful.com*